प्रभूतं विमलं सारं समाराध्यं परमसुखं विन्यस्य आधारशक्त्यादि अं सूर्य्यमण्डलाय द्वादशकलात्मने नमः इत्यन्तं विन्यसेत्। तथा च निबन्धे।
"पीठे क्रमेण प्रथमं दिक्षु मध्ये च संयजेत्।
प्रभूतं विमलं सारं समाराध्यमनन्तरम् ॥
परमादि सुखं पीठं स्वबिम्बान्तं प्रकल्पयेत् ॥"
ततः केशरेषु मध्ये च वां दीप्तायै नमः ॥
एवं वीं सूक्ष्मायै वूं जयायै वें भद्रायै वैं विभूत्यै वों विमलायै वौं अमोघायै वं विद्युतायै वः सर्व्वतोमुख्यै। तथा च निबन्धे।
"दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः
अमोघा विद्युता सर्व्वतोमुखी पीठशक्तयः ॥
दीप्तदीपशिखाकारान् बीजन्यासान् विदुः क्रमात्।
अक्षीवक्रस्ववितयस्वरान् बिन्दग्निसंयुतान् ॥"
तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः। यथा च शारदायाम्।
"वदेत् पदं चतुर्थ्यन्तं ब्रह्मविष्णुशिवात्मकम्।
सौराय योगपीठाय नमःपदमनन्तरम् ॥
पीठमन्त्रोऽयमाख्यातो दिनेशस्य जगत्पतेः ॥"
तत ऋष्यादिन्यासः। शिरसि देवभागऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि आदित्याय देवतायै नमः। निबन्धे।
"देवभागो मुनिः प्रोक्तो गायत्रीच्छन्द ईरितम्
आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः ॥"
ततः कराङ्गन्यासौ। सत्याय तेजोज्वालामणे हुँ फट् स्वाहा अङ्गुष्ठाभ्यां नमः। एवं ब्रह्मणे १०तर्ज्जनीभ्यां स्वाहा। विष्णवे१०मध्यमाभ्यां वषट्। रुद्राय१०अनामिकाभ्यां हुम्। अग्नये १० कनिष्ठाभ्यां वौषट्। सर्व्वाय १० करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च शारदायाम्।
"सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितम्।
विष्णवे स्याच्छिखावर्म्म रुद्राय परिकीर्त्तितम्॥
अग्नये नेत्रमाख्यातं सर्व्वायास्त्रमुदीरितम्।
तेजोज्वालामणे हुँ फट् द्विठान्ताः परिकीर्त्तिताः ॥"
ततो मूर्त्तिन्यासः। यथा शिरसि ॐ आदित्याय नमः। मुखे एं रवये। हृदये ऊं भानवे। गुह्ये ईं भास्कराय। चरणयोः अं सूर्य्याय। तथा च निबन्धे।
"आदित्यं विन्यसेन्मूर्ध्नि रविं मुखगतं न्यसेत्।
हृदये भानुनामानं भास्करं गुह्यदेशतः।
सूर्य्यं चरणयोर्न्यस्येद्वर्णैः सत्यादिपञ्चभिः ॥"
ततो मन्त्रन्यासः। शिरसि ॐ ॐ नमः। मुखे ॐ घृ नमः। कण्ठे ॐ णि नमः। हृदि ॐ सू नमः। कुक्षौ ॐ र्य्य नमः। नाभौ ॐ आ नमः। लिङ्गे ॐ दि नमः। पादयोः ॐ त्य नमः। तथा च।
"मूर्द्धास्यकण्ठहृदयकुक्षिनाभिध्वजाङ्घ्रिषु।
मन्त्रवर्णान्न्यसेदष्टौ प्रत्येकं प्रणवादिकान् ॥"*॥
ततो ध्यानम्।
"रक्ताब्जयुग्माभयदानहस्तं
केयूरहाराङ्गदकुण्डलाढ्यम्।
माणिक्यमौलिं दिननाथमीडे
बन्धूककान्तिं विलसत्त्रिनेत्रम् ॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कृत्वा गुरुपंक्तिं संपूज्य पीठपूजां कुर्य्यात्। ततः खं खसोल्काय नमः। इति मन्त्रेण मूर्त्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। तथा च निबन्धे।
"तारादि खं खसोल्काय मनुना मूर्त्तिकल्पना
साधिष्ठं सर्व्वलोकानां तस्यामावाह्य पूजयेत्"
केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च सत्याय तेजोज्वालामणे हुँ फट् स्वाहा हृदयाय नमः। एवं ब्रह्मणे शिरसे स्वाहा। विष्णवे शिखायै वषट्। रुद्राय कवचाय हुम्। अग्नये नेत्रत्रयाय वौषट्। सर्व्वाय अस्त्राय फट्। दिक्पत्रेषु पूर्व्वादि ॐ आदित्याय नमः। एवं एं रवये ऊं भानवे ईं भास्कराय। विदिक्पत्रेषु अग्न्यादि उं उषायै पं प्रज्ञायै पं प्रभायै सं सन्ध्यायै। तथा च।
"अङ्गानि पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्तयः।
आदित्याद्यास्ततस्तोऽस्त्राः शक्तयः कोणपत्रगाः ॥
स्वस्वनामादिवर्णाः स्युस्तासां बीजान्यनुक्रमात्
उषा प्रज्ञा प्रभा सन्ध्या शक्तयः परिकीर्त्तिताः॥"
ततः पत्राग्रेषु ब्राह्म्याद्याः संपूज्य पुरतोऽरुणमर्च्चयेत्। तथा च शारदायाम्।
"पत्राग्रसंस्था ब्राह्म्याद्याः पुरतोऽरुणमर्च्चयेत्।"
तद्बाह्ये चन्द्रादीन् पूजयेत्। यथा चन्द्राय नमः एवं मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे। तथा च शारदायाम्।
"चन्द्रादीन्पूजयेत्पश्चात्ग्रहानष्टौ ततो बहिः॥"
ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादि विसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः। तथा च।
"वसुलक्षं जपेन्मन्त्रं समिद्भिः क्षीरशाखिनाम्।
तद्दशांशं प्रजुहुयात् क्षीराक्ताभिर्जितेन्द्रियः॥"
वाचनिक एवाष्टसहस्रहोमः॥*॥मन्त्रान्तरं यथा
"आकाशमग्निदीर्घेन्दुसंयुतं भुवनेश्वरी।
सर्गान्वितो भृगुर्भानोस्त्र्यक्षरोऽयं समीरितः ॥"
ह्रां ह्रीं सः। अस्य पूजाप्रयोगः। प्रातःकृत्यादिपूर्व्वमन्त्रोक्तपीठन्यासं विधाय पूर्व्वोक्तऋष्यादिन्यासं कुर्य्यात्। ततो मन्त्रन्यासः। यथा आधारादिपादपर्य्यन्तं ह्रां नमः। कण्ठादाधारपर्य्यन्तं ह्रीं नमः। मूर्द्धादिकण्ठपर्य्यन्तं सः नमः। शारदायाम्।
"आधारादिपदापान्तं कण्ठादाधारकावधि।
मूर्द्धादिकण्ठपर्य्यन्तं क्रमाद्बीजत्रयं न्यसेत् ॥"
ततः कराङ्गन्यासौ। ह्रां अङ्गुष्ठाभ्यां नमः। ह्रीं तर्ज्जनीभ्यां स्वाहा। ह्रूं मध्यमाभ्यां वषट् ह्रैं अनामिकाभ्यां हुं। ह्रौं कनिष्ठाभ्यां वौषट्। ह्रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च निबन्धे।
"षड्दीर्घभाजा मध्येन बीजेनाङ्गानि कल्पयेत्॥"
ततो ध्यानम्।
"रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम् ॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा पूर्व्वोक्तक्रमेण पीठपूजां विधाय मूलमन्त्रेण मूर्त्तिं सङ्कल्प्य पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्निनिर्ऋतिवायुशानेषु मध्ये दिक्षु च ह्रां हृदयाय नमः इत्यादिना पूजयेत्। पत्रेषु चन्द्रादीन् पूजयेत्। तत इन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रमाज्येन च दशांशतः।
तिलैर्व्वा मधुरासिक्तैर्जुहुयाद्विजितेन्द्रियः ॥"
मन्त्रान्तरम्।
"आकाशमग्निपवनसत्यान्तार्घीशबिन्दुमत्।
मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतम् ॥
पुटितं विश्वबीजेन सर्व्वकामफलप्रदम् ॥"
विश्वबीजमाह।
"टान्तं दहननेत्रेन्दुसहितं तदुदाहृतम् ॥"
ठ्रिं ह्रौड़ं ठ्रिम्। अस्य पूजाप्रयोगः। प्रातःकृत्यादि पूर्व्ववत् एतन्मन्त्रोक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। ततो मूर्त्तिन्यासः। ठ्रं सूर्य्याय नमोऽङ्गुष्ठयोः। ठ्रिं भास्कराय नमस्तर्ज्जन्योः। ठ्रुं भानवे नमः मध्यमयोः। ठ्रें रवये नमोऽनामिकयोः। ठ्रौं दिवाकराय नमः कनिष्ठयोः। ततः शिरसि वदने हृदये गुह्ये पाददेशेषु तास्तत्तद्बीजादिका न्यसेत्। तथा च निबन्धे।
"पञ्चह्रस्वाढ्यबीजेन पञ्चमूर्त्तीः प्रविन्यसेत्।
अङ्गुष्ठादिकनिष्ठान्तं अङ्गुलिषु क्रमादिमाः ॥
सूर्य्यस्तु भास्करो भानुस्ततो रविदिवाकरौ।
शिरोवदनहृद्गुह्यपाददेशेषु ताः क्रमात् ॥"
ततः कराङ्गन्यासौ। ठ्रां अङ्गुष्ठाभ्यां नमः। ठ्रीं तर्ज्जनीभ्यां स्वाहा। ठ्रूं मध्यमाभ्यां वषट्। ठ्रैं अनामिकाभ्यां हुम्। ठ्रौं कनिष्ठाभ्यां वौषट्। एवं हृदयादिषु। ठ्रां हृदयाय नमः इत्यादि। तथा च निबन्धे।
"दीर्घयुक्तेन बीजेन नेत्रान्ताङ्गानि विन्यसेत्।"
ततो मूलबीजेन व्यापकं कृत्वा ध्यायेत्। तथा च।
"व्यापकं मूलबीजेन कुर्व्वीत तदनन्तरम्।"
ध्यानम्।
हेमाम्भोजप्रवालप्रतिमनिजरुचिं चारु-
खट्वाङ्गपद्मौ
चक्रं शक्तिं सपाशं सृणिमतिरुचिरामक्ष-
मालां कपालम्।